श्री महाशास्त अनुग्रह कवचं

श्रीगणेशाय नमः ।
अथ महाशास्त्रनुग्रहकवचं प्रारभ्यते ॥

श्रीदेव्युवाच
भगवन् देवदेवेश सर्वज्ञ त्रिपुरांतक ।
प्राप्ते कलियुगे घोरे महाभूतैः समावृते ॥1॥

महाव्याधिमहाव्याळघोरराजैः समावृते ।
दुःस्वप्नघोरसंतापैः दुर्विनीतैः समावृते ॥2॥

स्वधर्मविरते मार्गे प्रवृत्ते हृदि सर्वदा ।
तेषां सिद्धिं च मुक्तिं च त्वं मे ब्रूहि वृषध्वज ॥3॥

ईश्वर इवाच
शृणु देवि महाभागे सर्वकल्याणकारणे ।
महाशास्तुश्च देवेशि कवचं पुण्यवर्धनं ॥4॥

अग्निस्तंभजलस्तंभसेनास्तंभविधायकं ।
महाभूतप्रशमनं महाव्याधिनिवारणं ॥5॥

महाज्ञानप्रदं पुण्यं विशेषात्कलितापहं ।
सर्वरक्षाकरं दिव्यमायुरारोग्यवर्धनं ॥6॥

किमतो बहुनोक्तेन यं यं कामयते द्विजः ।
तं तमाप्नोत्यसंदेहो महाशास्तुः प्रसादतः ॥7॥

कवचस्य ऋषिर्ब्रह्मा गायत्रीश्छंद उच्यते ।
देवता श्रीमहाशास्ता देवो हरिहरात्मजः ॥8॥

षडंगमाचरेद्भक्त्या मात्रया जातियुक्तया ।
ध्यानमस्य प्रवक्ष्यामि शृणुष्वावहिता प्रिये ॥9॥

अस्य श्रीमहाशास्तुः कवचस्तोत्रमहामंत्रस्य ब्रह्मा ऋषिः ।
गायत्रीः छंदः । महाशास्ता देवता ।
(ह्रां)प्रां बीजं । (ह्रीं)प्रीं शक्तिः । (ह्रूं)प्रूं कीलकं
श्रीमहाशास्तुः प्रसादसिद्धर्थे जपे विनियोगः ।
(ह्रां)प्रां इत्यादि षडंगन्यासः ॥

अथ ध्यानं ।
तेजोमंडलमध्यगं त्रिनयनं दिव्यांबरालंकृतं
देवं पुष्पशरेक्षुकार्मुकलसन्माणिक्यपात्राभयं ।
बिभ्राणं करपंकजे मदगजस्कंधाधिरूढं विभुं
शास्तारं शरणं व्रजामि सततं त्रैलोक्यसम्मोहनं ॥

(लमित्यादि पंचोपचारपूजा ।)
महाशास्ता शिरः पातु भालं हरिहरात्मजः ।
कामरूपी दृशौ पातु सर्वज्ञो मे श्रुती सदा ॥1॥

घ्राणं पातु कृपाध्यक्षो मुखं गौरीप्रियः सदा ।
वेदाध्यायी च मे जिह्वां पातु मे चिबुकं गुरुः ॥2॥

कंठं पातु विशुद्धात्मा स्कंधौ पातु सुरार्चितः ।
बाहू पातु विरूपाक्षः करौ तु कमलाप्रियः ॥3॥

भूताधिपो मे हृदयं मध्यं पातु महाबलः ।
नाभिं पातु महावीरः कमलाक्षोऽवतात्कटिं ॥4॥

अपानं पातु विश्वात्मा गुह्यं गुह्यार्थवित्तमः ।
(समीपं पातु विश्वेशो गुह्यं गुह्यार्थवित्सदा)
ऊरू पातु गजारूढो वज्रधारी च जानुनी ॥5॥

जंघे पाशांकुशधरः पादौ पातु महामतिः ।
सर्वांगं पातु मे नित्यं महामायाविशारदः ॥6॥

इतीदं कवचं पुण्यं सर्वाघौघनिकृंतनं ।
महाव्याधिप्रशमनं महापातकनाशनं ॥7॥

ज्ञानवैराग्यदं दिव्यमणिमादिविभूषितं ।
आयुरारोग्यजननं महावश्यकरं परं ॥8॥

यं यं कामयते कामं तं तं प्राप्नोत्यसंशयः ।
त्रिसंध्यं यः पठेद्विद्वान् स याति परमां गतिं ॥9॥

इति श्रीगुह्यरत्नचिंतामणौ श्रीमहाशास्त्रनुग्रहकवचं संपूर्णं ।